॥अथ दक्षरथलक्षिता पूजा प्रारंभः॥

॥श्रीगणेशायनमः॥अथदशारथललितापारंभः॥आचम्य॥ललितापू
जाणानायम्य॥ममइहजन्मनिजन्मांतरेचअखंडितसुखसो
भाग्यादिअभिवृद्धिसंततिपुत्रपौत्राद्यभिवृद्ध्यर्थं॥श्रीदशांग
ललितामीत्यर्थंयथामिलितोपचारैः षोडशोपचारैः॥ललिता
पूजनमहंकरिष्ये॥तदंगगणपतिपूजनंआसनादिकर्मकरि
ष्ये॥गुणानांत्वागुणपतिंहवामहेकविंकवीनामुपमश्रवस्त
मं॥ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसी
दसादनं॥महागणपतयेनमोनमः॥कलशास्यमुखेविष्णुः
कंठेरुद्रसमाश्रिताः॥मूलेतत्रस्थितोब्रह्मामध्येमातृगणा
स्मृताः॥कुक्षौतुसागराः सर्वेससप्तद्वीपावसुंधरा॥ऋग्वेदोथ
यजुर्वेदः सामवेदोह्यथर्वणः॥अंगैश्चसहिताः सर्वेकल
शंतुसमाश्रिताः॥अत्रगायत्रीसावित्रीशांतिःपुष्टीकरी
तथा॥आयांतुदेवपूजार्थंदुरितक्षयकारकाः॥गंगेचयमु
नेचैवगोदावरीसरस्वती॥नर्मदेसिंधुकावेरीजलेस्मिन्सं

निधंकुरुकलशदेवताभ्योनमः॥विलेपनार्थेचंदनंसमर्पया
मि॥कलशदेवताभ्योनमः॥पूजार्थेपुष्पंसमर्पयामि॥धेनुम
ुद्रांप्रदर्श्य॥ॐपवित्रःपवित्रोवासर्वावस्थांगतोपिवा॥यस्म
रेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः॥पूजासंभारान्निरीक्ष्य॥
आत्मानंनिरीक्ष्य॥अथध्यानं॥नीलकोशेयवसनांहेमांभो
रुहासनां॥भक्तानांवरदानित्यंललितांचिंतयाम्यहं॥दशांगललितायैनमः॥ध्यायेध्यानार्थेअक्षतान्स
मर्पयामि॥हिरण्यवर्णांहरिणींसुवर्णरजतस्रजां॥
चंद्रांहिरण्मयींलक्ष्मींजातवेदोमआवह॥आगच्छव
रदेदेवीललितेभक्तवत्सले॥दशांगललितेमातेदे
हिमेव्रतकर्मणि॥दशांगललितायैनमः॥आवाहना
र्थेअक्षतान्समर्पयामि॥तांमआवहजातवेदोलक्ष्मी
मनपगामिनीं॥यस्यांहिरण्यंविंदेयंगामश्वंपुरुषानहं॥
ललितेदैत्यनाशापअवतारकृतास्वयं॥त्राहिमांललि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तेदेवीअवेधव्यंप्रयछमे॥दशांगगुग्गुलुतायेनमः आसनार्थे
अक्षतान्त्समर्पयामि॥सुचूर्णंरथमुद्यांहस्तिनादप्रमो
दिनीं॥श्रियंदेवीमुपह्वयेश्रीर्मादेवीर्जुषताम्॥गजाजलंसमा
नीतंसुवर्णकलशोस्थितं॥पाद्यार्थमाहृतंभक्त्यागृह्याण
परमेश्वरी॥दशांगगुग्गुलुतायेनमः॥मादयोः पाद्यंसमर्पया
मि॥कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्प
यंतीं॥पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं॥दशरथा
मयादेवीदशपुष्पादशांगगुग्गुलुधूपेनसहितेदेवीअर्घ्य
गृह्णंतुनमोस्तुते॥दशांगगुग्गुलुतायेनमः॥अर्घ्यंसमर्पया
मि॥चंद्रप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदाराम्॥
तांपद्मनेमिंशरणमुहंप्रपद्येअलक्ष्मीर्मेनश्यतांत्वांवृणो
मि॥दक्षस्यदुहितादेवीसौभाग्यारोग्यदायिनी॥आचम्य
तांमहादेवीगुग्गुलुतेतनुसोस्कृते॥दशांगगुग्गुलुतायेनमः ॥२॥
आचमनीयंसमर्पयामि॥आदित्यवर्णेतपसोधिजा

तोवनस्पतिःस्तवृक्षोथबिल्वस्तस्यफलानितपसानुदंतु
मायांतरायाश्चबाह्याअलक्ष्मीः॥गंगातोयंसमानीतंसुवर्ण
कलशोस्थितं॥स्नानायतेमयाभक्त्यानीरंस्वीक्रियतामिति॥
दशांगगुग्गुलुतायेनमः॥स्नानंसमर्पयामि॥अथपंचामृतस्नानं
कामधेनुसमुद्भूतंदुग्धंचामृतमुत्तमं॥स्नानार्थंचमयानीतं
तंगृह्याणपरमेश्वरी॥दशांगगुग्गुलुतायेनमः॥पयस्नान
समर्पयामि॥सकलपूजार्थेअक्षतान्समर्पयामि॥गोदु
ग्धंविकृतंदेविदधिरूपंगुणालयं॥स्नानार्थंचमयानीतं
स्वीकुरुत्वंजगत्प्रिये॥दशांगगुग्गुलुतायेनमः॥दधिस्नान
समर्पयामि॥ सकलपूजार्थेअक्षतान्समर्पयामि॥
गोघृतंचमयानीतंदेवानांहविरुत्तमं॥पावनंसर्वलोका
नांगृह्याणसुरसुंदरी॥दशांगगुग्गुलुतायेनमः॥घृतस्नान
समर्पयामि॥सकलपूजार्थेअक्षतान्समर्पयामि॥पुष्प
भ्यःसारमादायमक्षिकाभिःकृतंमधु॥स्नानार्थंचमया

दत्तंगृह्णसुरपूजिते॥दशांगलक्षितायेनमः॥मधुस्ना
नंसमर्पयामि॥सकलपूजार्थेअक्षतान्त्समर्पयामि॥शर्क
राचसितांश्रेष्ठादक्षुसारसमुद्भवा॥स्नानार्थंचमयादत्ता
गृह्णाणपरमेश्वरी॥दशांगलक्षितायेनमः॥शर्करास्ना
नंसमर्पयामि॥ सकलपूजार्थेअक्षतान्त्समर्पयामि॥
अभ्यंगार्थंमयादत्तंतैलंपुष्पादिवासितं॥प्रयत्नेनाजि
तंशुद्धंगृह्णाणपरमेश्वरी॥दशांगलक्षितायेनमः॥सुगंध
तैलंसमर्पयामि॥अंगोद्वर्त्तनकंदेविकृ स्नूर्याकुंकुमे
नच॥अन्यैःसुगंधिद्रव्यैश्चनिर्मितंपरमेश्वरी॥दशांगल
क्षितायेनमः॥अंगोद्वर्त्तनंसमर्पयामि॥जाह्नवीतोयमा
नीतंजलकर्पूरमिश्रितं॥स्नापयामिसुरश्रेष्ठेत्वांपुत्रादि
धनप्रदां॥नानातीर्थादाहृतंचूतोयुक्तंमयाकृतं॥स्ना
नार्थंचमयादत्तंगृह्णाणपरमेश्वरी॥दशांगलक्षितायेन
मः॥उष्णोदकस्नानंसमर्पयामि॥गंगाचयमुनाचैव

॥३॥

नर्मदाचसरस्वती॥गोदावरीभीमरथीकावेरीचसरिद्वरा॥
दशांगलक्षितायेनमः॥षष्ठेनगंधोदकस्नानंसमर्पयामि
उत्तरतःनिर्मोल्यंविसृज्य॥अभि षेकः॥सुरास्त्वाम्भि
षिंचंतुब्रह्मविष्णुमहेश्वराः॥वासुदेवोजगन्नाथस्तथा
संकर्षणोविभुः॥१॥प्रद्युम्नश्चानिरुद्धश्चभवंतुविजया
यते॥आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा॥२॥
वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः॥ब्रह्मणा
सहिताःसर्वेदिक्पालाःपांतुतेसदा॥३॥कीर्त्तिर्लक्ष्मि
र्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः॥बुद्धिर्लज्जावपुःशां
तिःकांतिःपुष्टिश्चमातरः॥४॥एतास्त्वामभिषिंचंतुदेव
पत्न्यःसमागताः॥आदित्यश्चेंद्रमाभौमोबुधजीवसि
तार्कजाः॥५॥ग्रहास्त्वामभिषिंचंतुराहुकेतुश्चसंज्ञि
ताः॥देवदानवगंधर्वायक्षराक्षसपन्नगाः॥६॥
ऋषयोमुनयोगावोदेवमातरएवच॥देवपत्न्योद्रुमा

नागादैत्याश्चाप्सरसांगणाः॥ ७॥ अस्त्राणिसर्वशस्त्राणिरा
जानोवाहनानिच॥ओषधानिचरत्नानिकालस्यावयवाश्च
ये॥८॥ सरितःसागराःशैलास्तीर्थानिजलदानदाः॥एते
त्वामभिषिंचंतुसर्वकामार्थसिद्धये॥९॥ दशांगललितायै
नमः॥अभिषेकस्नानंसमर्पयामि॥आचमनीयंसमर्पया
मि॥शुद्धोदकस्नानंसमर्पयामि॥ इंद्रादिलोकपालानावा
ह्याभ्यर्चयामि॥दशांगललितायैनमःएतत्पाद्यंसमर्पया
मिनमःपूजयामिनमः॥उमायैनमःपादौपूजयामि॥ कात्यायिन्यैन
मःगुल्फौपूजयामि॥गौर्यैनमःजानुनीपूजयामि॥कालि
कायैनमः॥नाभिंपूजयामि॥ऐश्वर्यैनमःकटिंपूजयामि॥
पुत्रदायिन्यैनमः॥हृदयंपूजयामि॥ सौभाग्यदायिन्यैन
मः॥कंठंपूजयामि॥रोहिण्यैनमः॥नेत्रेपूजयामि॥चंद्रि
कायैनमःललाटंपूजयामि॥सर्वमंगलदायिन्यैनमः॥
शिरःपूजयामि॥दशांगललितायैनमः॥सर्वांगंपूजया

दशांगललितायैनमः॥विलेपनार्थेचंदनंसमर्पयामि॥कुंकु
मंकांचनंदिव्यंकामिनीकामसंभवं॥कुंकुमेनार्चितेदेविललि
तायैनमोनमः॥कुंकुमक्तपत्रंहरिद्राकुंकुमांजनंसिंदू
रंदिव्यदास्यामिसौभाग्यंदेहिमेव्ययं॥दशांगललितायैन
मः॥सौभाग्यद्रव्यंसमर्पयामि॥केतकीमालतीजातिचंप
केभ्योवरानने॥ कर्कंदीक्षतपत्राणिपूजार्थंप्रतिगृह्यतां॥दशांग ललितायैनमः॥पूजार्थेपुष्पंसमर्पयामि॥
अथांगपूजा॥उमायैनमःपादौपूजयामि॥ कात्यायिन्यैन
मःगुल्फेपूजयामि॥गौर्यैनमःजानुनीपूजयामि॥कालि
कायैनमः॥नाभिंपूजयामि॥ऐश्वर्यैनमःकटिंपूजयामि॥
पुत्रदायिन्यैनमः॥हृदयंपूजयामि॥ सौभाग्यदायिन्यैन
मः॥कंठंपूजयामि॥रोहिण्यैनमः॥नेत्रेपूजयामि॥चंद्रि
कायैनमःललाटंपूजयामि॥सर्वमंगलदायिन्यैनमः॥
शिरःपूजयामि॥दशांगललितायैनमः॥सर्वांगंपूजया

मि॥अथपत्रीपूजा॥बकुरूपायेनमः॥बिल्वपत्रंसमर्पयामि॥अ
शोकनाशिन्यैनमः॥अशोकपत्रंसमर्पयामि॥जगद्धात्र्यै न
मः॥धात्रीपत्रंसमर्पयामि॥महेश्वर्यैनमः॥दूर्वापत्रंसमर्पया
मि॥कपर्दिन्यैनमः॥करवीरपत्रंसमर्पयामि॥कपालधारि
ण्यैनमः॥कदंबपत्रंसमर्पयामि॥ब्राह्म्यैनमः॥ब्राह्मीपत्रं
समर्पयामि॥दुर्जयायैनमः॥धत्तूरपत्रंसमर्पयामि॥चंद्रघ
ण्टायैनमः॥अपामार्गपत्रंसमर्पयामि॥दक्षकन्यकायैनमः॥
कर्कटीपत्रंसमर्पयामि॥रोहिण्यैनमः॥नानाविधपत्रंस
मर्पयामि॥अथपुष्पपूजा॥चतुर्वर्गप्रियायैनमः॥चंपकपु
ष्पंसमर्पयामि॥कविप्रियायैनमः॥केतकीपुष्पंसमर्पया
मि॥कूर्मायैनमः॥करवीरपु ष्पंसमर्पयामि॥बुद्धिप्रकाश
यैनमः॥बकुलपुष्पंसमर्पयामि॥धनदायैनमः॥धत्तूरपुष्प
समर्पयामि॥दुर्गभव्यैनमः॥जातीपुष्पंसमर्पयामि॥पार्व
तीप्रियायैनमः॥पुन्नागपुष्पंसमर्पयामि॥चंद्रमनोह

॥५॥

रायैनमः॥कर्कटीपुष्पंसमर्पयामि॥रोहिण्यैनमः॥मल्लिका
पुष्पंसमर्पयामि॥दक्षकन्यकायैनमः॥नानाविधपुष्पंसमर्पे
यामि॥अथअष्टोत्तरशतनामावळीप्रारंभः॥रोहिण्यैन
मः॥महेश्वर्यैनमः॥१॥विद्यायैनमः॥२॥जगन्मात्रेनमः॥३॥
मृडाल क्ष्म्यैनमः॥४॥शिवप्रियायैनमः॥५॥वि माया
यैनमः॥६॥शिवायैनमः॥७॥ शांतायैनमः॥८॥सिद्ध
यैनमः॥९॥सरस्वत्यैनमः॥१०॥क्षमायैनमः॥११॥का
त्यैनमः॥१२॥प्रभायैनमः॥१३॥ज्योत्स्नायैनमः॥१४॥
पार्वत्यैनमः॥१५॥विश्वमंगळायैनमः॥१६॥हिंगु
लायैनमः॥१७॥चंडिकायैनमः॥१८॥दात्रायैनमः॥
१९॥पद्मायैनमः॥२०॥प्रीतायैनमः॥२१॥त्रिपुरायैन
मः॥२२॥नंदिन्यैनमः॥२३॥नंदायैनमः॥२४॥नंदिन्यै
नमः॥२५॥सुरवंदितायैनमः॥२६॥यज्ञविद्यायैन
मः॥२७॥महामायायैनमः॥२८॥देवमात्रेनमः॥२९॥

शुद्धायेनमः॥३१॥धृत्यैनमः॥३२॥श्रीत्यैनमः॥३३॥स्थियायेन
मः॥३४॥ऋसिद्धायैनमः॥३५॥मृडायैनमः॥३६॥विध्यवा
सिन्यैनमः॥३७॥सिध्यैनमः॥३८॥विद्यायैनमः॥३९॥
महाशक्तयेनमः॥४०॥धृथियैनमः॥४१॥नारदसेविता
यैनमः॥४२॥पुरुहूतस्त्रियायैनमः॥४३॥कांत्यैनमः॥४४॥
मालिन्यैनमः॥४५॥पद्मलोचनायैनमः॥४६॥महादित्यै
नमः॥४७॥महामायायैनमः॥४८॥दुर्गायैनमः॥४९॥
दुर्गार्त्तिनाशिन्यैनमः॥५०॥ज्वालामुख्यैनमः॥५१॥
सुगात्रायैनमः॥५२॥दुर्गायैनमः॥५३॥जातीकुमुद
वासिन्यैनमः॥५४॥दुर्गायैनमः॥५५॥दुर्लभायैनमः॥
५६॥विद्यायैनमः॥५७॥स्वर्गत्यैनमः॥५८॥पुरवासि
न्यैनमः॥५९॥अपर्णायैनमः॥६०॥शाभवायैनमः॥६१॥
सामायैनमः॥६२॥वृंदियायैनमः॥६३॥मृदुवासिन्यै ॥७॥
नमः॥६४॥नारायण्यैनमः॥६५॥महानिद्रायैनमः॥

॥६६॥योगनिद्रायैनमः॥६७॥सभाविन्यैनमः॥६८॥प्रज्ञा
यैनमः॥६९॥परिमितायैनमः॥७०॥तारायैनमः॥७१॥
मधुमत्यैनमः॥७२॥मध्यैनमः॥७३॥क्षीरार्णवसुतायैन
मः॥७४॥कालिकायैनमः॥७५॥सिंहगामिन्यैनमः॥७६॥
ॐकारायैनमः॥७७॥अमृधाकारायैनमः॥७८॥चेतनायै
नमः॥७९॥कोपनायैनमः॥८०॥क्षित्यैनमः॥८१॥ऊर्ध्व
बिंदुधारायैनमः॥८२॥धीरायैनमः॥८३॥विश्वामित्रै
नमः॥८४॥कालरात्र्यैनमः॥८५॥पद्मायैनमः॥८६॥
सुवस्त्रायैनमः॥८७॥प्रबुद्धायैनमः॥८८॥सुरेश्वर्यै
नमः॥८९॥कमलवासिन्यैनमः॥९०॥जगद्धात्र्यैनमः॥९१॥
जनेश्वर्यैनमः॥९२॥बुद्धायैनमः॥९३॥जनमात्रेनमः॥
॥९४॥जननेत्रायैनमः॥९५॥शांतरूपायैनमः॥९६॥
वार्त्तायैनमः॥९७॥दंडरूपायैनमः॥९८॥बृहतारिण्यै
नमः॥९९॥श्रद्धायैनमः॥१००॥दशरथायैनमः॥१०१॥

रोहिण्येनमः॥१०२॥रजनिप्रियायेनमः॥१०३॥चंद्रचैत्ये
नमः॥१०४॥ सुरूपायेनमः॥१०५॥जगन्मात्रेनमः॥१०६॥
पुत्रप्रदायेनमः॥१०७॥सुहृदायेनमः॥१०८॥ कर्दमेन
प्रजाभूतामयिसंभवकर्दमा॥ श्रियंवासयमेकुलेमा
तरंपद्ममालिनीं॥वनस्पतिरसोद्भवोगंधाढ्योगंधउत्त
मः॥आघ्रेयः सर्वदेवानांधूपोयंप्रतिगृह्यताम्॥दशांगल
लितायेनमः॥प्रत्यक्षधूपंसमर्पयामि॥आपुःसृजंतु
स्निग्धानिचिक्लीतवसमेगृहे॥नीचदेवीं मातरंश्रियंवा
सयमेकुले॥ऊर्जेचवृत्तिंसंयुक्तंवह्निनायोजितंमया॥
दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहा॥भक्त्यादीपं
प्रयच्छामिदेवायपरमात्मने॥त्राहिमांनरकाद्घोरादीपो
ज्योतिर्नमोस्तुते॥दशांगललितायेनमः॥प्रत्यक्षदी
पंसमर्पयामि॥आर्द्रांयःकरिणींयष्टिंसुवर्णांहेममा
लिनीं॥सूर्यांहिरण्मयींलक्ष्मींजातवेदोममावह॥

दशांगललितायेनमः॥यथासोपस्करमोदकं महानैवेद्यं
समर्पयामि॥पूगीफलंमहद्दिव्यंनागवल्यादलैर्युतं॥कर्पू
रैलासमायुक्तंताबूलंप्रतिगृह्यताम्॥ दशांगललितायेन
मः॥मुखवासार्थंपूगीफलताबूलंसमर्पयामि॥हिरण्य
गर्भगर्भस्थहेमबीजविभावसोः॥अनंतपुण्यफलद
मतःशांतिप्रयच्छमे॥दशांगललितायेनमः॥सुवर्णपु
ष्पदक्षिणांसमर्पयामि॥ इदंफलंमयादेवस्थापितंपुर
तस्तव॥तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि॥दशांग
ललितायेनमः॥नारिकेलफलंसमर्पयामि॥क्षुद्रसर्व
रोगानांनिमिरस्यनिवारणं॥आर्त्तिक्यंकल्पितंभक्त्या
गृहाणपरमेश्वरी॥दशांगललितायेनमः॥महानीरां
जनदीपंसमर्पयामि॥कर्पूरगौरंकरुणावतारंसंसार
सारंभुजगेंद्रहारं॥सदावसंतंहृदयारविंदंभवंभवा न
सहितंनमामि॥दशांग ललितायेनमः॥महाकर्पूरनी

रांजनदीपंसमर्पयामि॥ततः कर्कटीपुष्पपूजा॥हस्योर्हस्त
योर्दशपुष्पाण्यादाय॥ॐमायेनमः॥पद्भ्यांपूजयामि॥कात्या
यन्यैनमः॥गुल्फाभ्यांपूजयामि॥गौर्यैनमः॥जानुभ्यांपू
जयामि॥कालिकायैनमः॥नाभ्यैपूजयामि॥ऐश्वर्यैनमः॥
कटिभ्यांपूजयामि॥पुत्रदायिन्यैनमः॥हृदयेपूजयामि॥
सौभाग्यदायिन्यैनमः॥कंठेपूजयामि॥गौर्यैनमः॥नेत्रा
भ्यांपूजयामि॥चंद्रप्रियायैनमः॥ललाटेपूजयामि॥
यानिकानिचपापानिजन्मांतरकृतानिच॥तानितानिविन
श्यंतिप्रदक्षिणपदेपदे॥दशांगलालितायैनमः॥
प्रदक्षिणांस्समर्पयामि॥तांमुआवहजातवेदोलक्ष्मी
मूलपगामिनीं॥यस्यांहिरण्यंप्रभूतंगावोदास्योश्वा
न्विंदेयंपुरुषानहं॥अश्वदायैगोदायैधनदायैमहाधने
धनमूलभूतादेवीसर्वकामाश्वदेहिमे॥दशांगलालिता
यैनमः॥मंत्रपुष्पांजलिंसमर्पयामि॥आवाहनंनजानामि

मिनजानामिततोचैवनजानामिक्षम्यतांपरमेश्वरीदशांगललितायैनमः॥सार्थनांसमर्पयामि॥अथवा
यनमंत्रः॥दशांगललितादेव्याव्रतसंपूर्णहेतवेसाधु
कंहिजवर्यायसहिरण्यंददाम्यहं॥दशांगललितायै
नमः॥इदंवायनदानं॥अन्यथाशरणंनास्तित्वमेवशरणं
ममात्वत्स्मात्कारुण्यभावेनरक्षरक्षपरमेश्वरि॥अनेनय
थाज्ञाननकृतपूजनेनषोडशोपचारैःदशांगललिता
देवताभ्यःश्रीपरमात्मनमः॥देवदेवजगन्नाथलक्ष्मीप्रिय
जनार्दनाकथयत्वसुरश्रेषदशांगललितांब्रूहि॥
दशांगललितायैनमः॥इदमर्घ्यंसमर्पयामि॥क्षीरो
दार्णवसंभूतलक्ष्मीत्वंधोदिवाकरात्॥गृहाणार्घ्यंमयादत्तं
रोहिण्यासहितःशशिन्॥दशांगललितायैनमः॥इद
मर्घ्यंसमर्पयामि॥पुत्रंदेहिधनंदेहिसौभाग्यंदेहिसुव्रते॥
पुत्रांदेहिधनंदेहिसर्वान्कामाश्वदेहिमे॥इदमर्घ्यंसमर्पयामि॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

MEMORIAL
NEHRU DAU

हस्तांतरणीय